धिकारात् प्राक्दुहितृधिकारस्मृतेः तद्वाधिकाया दुहितुः पुत्त्रेण बाध्यपुत्त्रबाधस्यैव न्याय्यत्वात् । इति दायक्रमसंग्रहश्च ॥

मातालौ, स्त्री, ( मातुः आली । पृषोदरादित्वात् उकारलोपः । यद्वा, मातायाः आली ।) मातुः सखी । इति शब्दमाला ॥

मातुलः, पुं, ( मातुर्भ्राता । "पितृव्यमातुलेति ।" ४।२।३६। इति निपात्यते । तत्र "मातुर्डुलच् ।" इति वार्त्तिकात् डुलच् । ) मातृभ्राता । पितृश्यालकः । इत्यमरः । २ । ६ । ३१ । मामा इति भाषा ॥ तन्मरणे भागिनेयस्य पक्षिण्यशौचम् । यथा, शुद्धितत्त्वे ।
"मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ।"
स च मातामहपर्य्यन्तरहितस्य स्वतस्य प्रेतक्रियाद्यधिकारी । यथा,—
"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।"
इति शातातपीयपाठक्रमात् । इति शुद्धितत्त्वम् ॥
( मायते स्वाम्यादिना मीयते । मात+वाहुलकात् डुलच् । ) व्रीहिभेदः । मदनद्रुमः । ( मादयतीति । मद+णिच्+वाहुलकात् उलच् पृषोदरात् दस्य तकारत्वञ्च ।) धुस्तूरः । इति मेदिनी । ले, १२३ ॥ पर्य्यायो यथा,—
"धत्तूर धूर्त्त धुस्तूरा उन्मत्तः कनकाह्वयः ।
देवता कितवस्तूरी महामोहः शिवप्रियः ।
मातुलो मदनश्चास्य फले मातुलपुत्त्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
मा विद्यते तुला तुलना यस्य ।) सर्पविशेषः ।
इति हेमचन्द्रः । ३ । २१६ ॥

मातुलकः, पुं, ( मातुल+स्वार्थे कन् । ) धुस्तूरवृक्षः । इति राजनिर्घण्टः ॥ ( मातुलः । यथा, पञ्चतन्त्रे । १ । २४१ ॥
"सोऽपि तव मातुलको न समायातः ॥")

मातुलपुत्त्रकः, पुं, ( मातुलस्य धुस्तूरस्य पुत्त्रकः । ) धुस्तूरफलम् । इत्यमरः । २ । ४ । ७८ ॥ (यथास्य पर्य्यायः ।
"मातुलो मदनश्चास्य फले मातुलपुत्त्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मातुलतनयः । इति मेदिनी । के, २३५ ॥

मातुला, } स्त्री, ( मातुल+टाप् । मातुलस्य
मातुलानी, } स्त्री । "इन्द्रवरुणेति । ४।१।४९। ङीष् आनुक् च । ) मातुलपत्नी । इत्यमरभरतौ ।२।६।३०। मामी इति भाषा ॥ तन्मरणे पक्षिण्यशौचम् । यथा,—
"श्वशुरयोर्भगिन्याश्च मातुलान्याश्च मातुले ।
पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम् ॥"
इति शुद्धितत्त्वम् ॥

मातुलानी, स्त्री, ( मा निषिद्धे तुलां नयति प्राप्नोतीति । नी+क्विप् । ङीष् । ) कलायः । भङ्गा । इति मेदिनी । ने, २०३ ॥ ( यथास्याः पर्य्यायः । भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ॥")
शणः । इति हेमचन्द्रः । ४ । २४५ ॥ प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

मातुलाहिः, पुं, ( मा तुल्यतेऽसौ इति । तुल+मूलविभुजादित्वात् कः । मातुलश्चासौ अहिश्च ।) सर्पविशेषः । मालुया साप इति पेयुयाटी इति च भाषा । अयं खड्गाकृतिः आयतदेहः दीर्घलाङ्गूलः चतुष्पात् । इति मधुमाधवादयः ॥ तत्पर्य्यायः । मालुधानः २ । इत्यमरः ।१ ।८।३॥

मातुली, स्त्री, (मातुलस्य स्त्री । "मातुल+इन्द्रवरुणभवेति ।" ४ ।१।४९ । इति ङीष् "मातुलोपाध्याययोरानुग् वा ।" इति वार्त्तिकोक्तेः पक्षे आनुगभावः । ) मातुलपत्नी । इत्यमरः । २ । ६ । ३० ॥ भङ्गा इति शब्दचन्द्रिका ॥

मातुलुङ्गः, पुं, ( मा न तुलं गच्छतीति । गम+डः । पृषोदरादित्वात् अकारस्योकारः मुम् च ।) बीजपूरः । इत्यमरटीकायां भरतः ॥ ( यथा, सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।
"केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम् ।
शर्कराद्राडिमाभ्यां वा द्राक्षाखर्ज्जूरयोस्तथा ॥"
( तथास्य पर्य्यायः ।
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
लुङ्गुषः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ।
तथास्य गुणाः ।
स्यान्मातुलुङ्गः कफवातहन्ता
हन्ता कृमीणां जठरामयघ्नः ।
स दोषरक्तादिविकारपित्त-
सन्दीपनः शूलविकारहारी ॥
श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनम् ।
दीपनं लघु वच्यञ्च मातुलुङ्गमुदाहृतम् ॥
त्वक्तिक्ता दुर्ज्जराति स्यात् कृमिवातकफापहा ।
स्वादु शीता गुरुः स्निग्धा तच्छांसं वातपित्तजित् ॥
मेध्यं शूलानिलच्छर्द्दिकफारोचकनाशनम् ।
दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केशरम् ॥
हृद्यं वर्णकरं वर्ष्यं रक्तमांसबलप्रदम् ।
शूलाजीर्णादिरोगेषु मन्दाग्नौ कफमारुते ॥
अरुचिश्वासकासेषु स्वरसोऽस्योपदिश्यते ।
रसोऽतिमधुरो हृद्यो वीर्य्यपित्तानिलापहः ॥
कफकृद्दुर्ज्जरः पाके मातुलुङ्गस्य कल्ककः ।
तिक्तं पुष्पन्तु बीजञ्च गुल्मतुल्यात्तथापरम् ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
"त्वक्तिक्ता कटुका स्निग्धा मातुलुङ्गस्य वातजित् ।
बृंहणं मधुरं मांसं वातपित्तहरं गुरु ॥
लघु तत्केसरं श्वासकासहिक्कामदात्ययान् ।
आस्यशोषानिलश्लेष्मविबन्धच्छर्द्द्यरोचकान् ॥
गुल्मोदरार्शः शूलानि मन्दाग्नित्वञ्च नाशयेत् ॥"
इति च वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)

मातुलुङ्गकः, पुं, ( मातुलुङ्ग+संज्ञायां स्वार्थे वा कन् ।) छोलङ्गवृक्षः । तत्पर्य्यायः । फलपूरः २ बीजपूरः ३ रुचकः ४ । इत्यमरः ।२। ४ ।७८ ॥ मातुलुङ्गः ५ श्वफलः ६ फलपूरकः ७ लुङ्गुषः ८ पूरकः ९ पूरः १० बीजपूर्णः ११ अम्लकेशरः १२ छोलङ्गः १३ । इति रत्नमाला । अस्य गुणाः । कट्वम्लत्वम् । अम्लत्वम् । लघुत्वम् । अग्निदीपनत्वम् । आध्मानगुल्मार्शोहृद्रोगोदावर्त्तनाशित्वम् । विबन्धहिक्काशूलच्छर्द्दिरोगे प्रशस्तत्वञ्च । अस्य त्वग्गुणाः । तिक्तत्वम् । दुर्ज्जरत्वम् । कफवातनाशित्वम् । विगतरसत्वञ्च । तन्मांसगुणाः । स्वादुत्वम् । शीतत्वम् । गुरुत्वम् । वायुपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मातुलुङ्गी, स्त्री, ( मातुलुङ्ग+ टाप् । ) मधुकर्कटी । यथा,—
"मातुलुङ्गी सुगन्धाख्या गिरिजा पूतिपुष्पिका ।
अत्यम्ला देवदूती च सा कथितमधुकर्कटी ॥"
इति रत्नमाला ॥

मातुलुङ्गिका, स्त्री, ( मातुलुङ्ग+संज्ञायां कन् । टाप् अकारस्येत्वम् । ) वनबीजपूरः । इति राजनिर्घण्टः ॥

मातृकच्छिदः, पुं, ( मातुः कं शिरश्छिनत्तीति । छिद+कः । पित्रादेशात् मातृशिरश्छेदनादस्य तथात्वम् । ) परशुरामः । इति केचित् ॥

मातृका, स्त्री,(मातेव । मातृ+"इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् टाप् । ) धातृका ॥ ( यथा, बृहत्संहितायाम् । ४३ । ६६ ।
"रज्ज्वङ्गच्छेदने बालपीडा
राज्ञो मातुः पीडनं मातृकायाः ॥"
मातेव । मातृ+स्वार्थे कन् । ) माता । देवीभेदः । वर्णमाला । इति मेदिनी । के,१३८॥ करणम् । स्वरः । उपमाता । इति हेमचन्द्रः ।
मातृकाणामुत्पत्तिर्यथा,—
"तत्र देवोऽप्यसौ दैत्यं त्रिशूलेनाहनद्भृशम् ।
तस्याहतस्य यद्रक्तमपतद्भूतले किल ॥
तत्रान्धका असंख्याता बभूवुरपरे भृशम् ।
तद्दृष्ट्वा महदाश्चर्य्यं रुद्रः शूलेऽन्धकं न्यधे ॥
गृहीत्वा त्रिशिखाग्रेण ननर्त्त परमेश्वरः ।
इतरेऽप्यन्धकाः सर्व्वे चक्रेण परमेष्ठिना ॥
नारायणेन निहतास्तत्र येऽन्ये समुत्थिताः ।
असृग्धारासुतारैस्तु शूलप्रोतस्य चासकृत् ॥
अनारतं समुत्तस्थुः खतो रुद्रो रुषान्वितः ।
तस्य क्रोधेन महता मुखाज्ज्वाला विनिर्ययौ ॥
तद्रूपधारिणीं देवीं यान्तीं योगेश्वरीं विदुः ।
स्वरूपधारिणी चान्या विष्णुनापि विनिर्म्मिता ॥
ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च ।
वाराहेण च देवेन विष्णुना परमेष्ठिना ॥
पातालोद्धरणं रूपं तस्या देव्या विनिर्ममे ।
माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः ॥
कारणं यस्य यत् प्रोक्तं क्षेत्रज्ञेनावधारितम् ॥
शरीरादेव नाना तु तदिदं कीर्त्तितं मया ।